# Eranda

पञ्चाङ्गुलः स्यादेरण्डः शुक्लश्च तिलकूपकः ।
आमुण्डको वर्धमानश्चित्रो गन्धर्वहस्तकः ॥
दीर्घदण्डो ग्रामजश्च मुनिश्च त्रिपुटीफलः ।
रक्तैरण्डो महामुण्डो महापञ्चाङ्गुलः पृथुः ॥
हस्तिकर्णी चोरुबूक उरुपुर्गजकर्णकः ।
शिखापत्रः सिरापत्रो महापत्रश्च कथ्यते ॥
व्याघ्रो व्याघ्रदलश्चेति शब्दैः पर्यायवाचकैः । (Aa. ma)

Eranda is also named as pancangula.
Synonyms are sukla, tilakupaka, amundaka, vardhamanaha, citra, gandharvahastaka, dirghadanda, gramaja, muni, triputiphala, rakta eranda, mahamunda, mahapanchangula, hastikarni, urubuka, urupurgaja karnaka, sikhapatra, sirapatra, mahapatra, vyaghra, vyaghradala.

(शुक्लस्तु तिलकूलक इति
श्ब्दैः पर्यायवाचकै: इति च कैरलीवाख्याने)

शुक्ल एरण्ड आमण्डश्चित्रो गन्धर्वहस्तकः ।
पञ्चाङ्गुलो वर्धमानो दीर्घदण्डो व्यडम्बक: ॥
रक्तोऽपरोरुबूकः स्यादुरुबूको रुबुस्तथा ।
व्याघ्रपुच्छश्च वातारिश्चञ्चुरुत्तानपत्रकः ॥ (Bpn)

Synonyms of sukla eranda are amanda, citra, gandharvahstaka, panchangula, vardhamana, dirgha danda, vyadambaka.
Rakta variety:urubuka, uroonbuka, rubuhu, vyaghrapuccha, vatari, canchu, uttanapatraka.

श्वेतैरण्डः सितैरण्डश्चित्रो गन्धर्वहस्तकः ।
आमण्डस्तरुणः शुक्लो वातारिर्दीर्घदण्डकः ॥
पञ्चाङ्गुलो वर्धमानो रुबुको द्वादशाह्वयः ।
रक्तैरण्डोऽपरो व्याघ्रा हस्तिकर्णी रुबस्तथा ॥
उरुबुको नागकर्णश्चञ्चुत्तानपत्रकः ।
करपर्णो याचनकः स्निग्धो व्याघ्रदलस्तथा ॥
तत्करश्चित्रबीजश्च ह्रस्वैरण्डस्त्रिपञ्चधा । (Rjn)

Sveta eranda, sita eranda, citra, gandharvahastaka, amandaha, tarunaha, sukla, vatari, dirghadandaka, pancangula, vardhamana, rubuka are the12 synonyms for sveta eranda.

Rakta eranda, vyaghra, hastikarni, rubuhu, urubuka, nagakarna, canchu, uttanapatraka, karaparna, yacanaka, snighda, vyaghradala, tatkara, citrabija, hrasva eranda are the synonyms for rakta eranda

एरण्डौ द्वौ वातहरौ शूलोदावर्तनाशनौ ।
वातरक्तहरौ सर्व एरण्डो मार्गशोधनः || (Mdn)

Both the types of eranda alleviate vata, cures vatarakta, sula, udavarta. Both are beneficial for marga Sodhana (waste elimination or laxation)

एरण्डयुग्मं मधुरमुष्णं गुरु विनाशयेत् ।
शूलशोफकटीवस्तिशिरःपीडोदरज्वरान् ॥
ब्रध्नश्वासकफानाहकासकृष्ठाममारुतान् ।

एरण्डपत्रं वातघ्नं कफकृमिविनाशनम् ॥
मूत्रकृच्छ्रहरं चापि पित्तरक्तप्रकोपणम् ।
वातार्यग्रदलं गुल्मवस्तिशूलहरं परम् ॥
कफवातकृमीन् हन्ति वृद्धिसप्तविधामपि ।

एरण्डफलमत्युष्णं गुल्मशूलानिलापहम् ll
यकृत्प्लीहोरार्शोघ्नं कटुकं दीपनं परम् l

तदून्मज्जा च विड्भेदी वातश्लेष्मोदरापहा ll (Bpn)

Both the types of eranda are madhura in rasa, usna in veerya, guru vinasana, cures sula, sopha, kati-vasti-sira pida, udara, jvara, bradhna, svasa, kasa, kapha, anaha, kustha, ama and maruta.

Eranda patra is vataghna, pitta rakta prakopana, vata hara para cures kapha, krmi, mutra krcchra, gulma, vasti sula, kapha, vata, krmi, saptavidha vrddhi.

Eranda phala is katuka in rasa, dipana param, highly usna in veerya, cures gulma, sula, anila, yakrt, pliha, udara, arsa.

Its majja is vit bhedi (laxative), cures vitiations of vata slesma and udara.

एरण्डस्तु रसे तिक्तः स्वादूष्णोऽनिलनाशनः l
उदावर्तं प्लीहागुल्मवस्तिशूलान्त्रवृद्धिनुत् ll
गुरुर्वातप्रशमनो विकारान् शोणितान् जयेत् l

फलं स्वादु च सक्षारं लघुष्णं भेदि वातजित् ll
एरण्डयुगलं वृष्यं स्वादु पित्तसमीरजित् l (Dhn)

Eranda is tikta, svadu in rasa, usna in veerya, alleviates anila, pacifies udavarta, pliha, gulma, vasti sula, antra vrddhi, guru vata, sonita vikara.

Phala is svadu in rasa, laghu in guna, usna in veerya, ksara, bhedi, vata hara. Both the types of eranda are svadu in rasa, vrsya, pitta samira hara.

श्वेतैरण्डः सकटुकरसस्तिक्त उष्णः कफार्त्ति-
ध्वंसं धत्ते ज्वरहरमरुत्कासहरी रसार्हः ।

रक्तैरण्डः श्वयथुपचनः वान्तिरक्तार्त्तिपाण्डु -
भ्रान्तिश्वासज्वरकफहरोऽरोचकघ्नो लघूश्च ॥ (Rjn)

Sveta eranda is katu, tikta in rasa, usna in veerya, pacifies kaphaja vyadhi, jvara, marut vikara, kasa, rasarha.

Rakta eranda is laghu in guna, svayathu pacana, cures vanti, rakta arti, pandu, bhranti, svasa, jvara, kapha, arocaka.

एरण्डो मधुरो वृष्यो गुरुष्णो मार्गशोधनः ।
कफपित्तानिलश्वासकासवर्ध्माश्मनाशनः ॥
गुल्मप्लीहोदरानाहकटीवस्तिशिरोरुजि ।
मेहज्वरामवातास्त्रशूलशोफेषु शस्यते ॥

एरण्डपत्रं वातघ्नं कफकृमिविनाशनम् ।
रक्तपित्तप्रकोपी स्यात् मूत्रदोषं जयेदपि ॥
गुल्मं च वस्तिशूलं च वृद्धिं सप्तविधां तथा ।
कफवातकृमींश्चपि हन्यादेरण्डपल्लवम् ॥

एरण्डपुष्पं वातघ्नं कफपित्तविनाशनम् ।
मूत्रदोषहरं ज्ञेयं रक्तपित्तप्रकोपणम् ॥

एरण्डफलमत्युष्णं गुल्मशूलनिलापाहम् ।
यकृत्प्लीहोदरार्शोघ्नं कटुकं दीपनं परम् ॥

तद्वन्मज्जा च विड्भेदी वातश्लेष्मोदरापहा ।

रक्तपञ्चाङ्गुलस्तिक्तः कषायः कटुको रसे ॥
वातश्लेष्मश्वासकासकम्पार्शोवर्ध्मनाशनः । (Kdn)

Eranda is madhura in rasa, guru in guna, usna in veerya, vrsya, marga sodhana, cures kapha, pitta, anila, svasa, kasa, asma, gulma, pliha, udara, anaha, kati-vasti-siro ruja, meha, jvara, amavata, asra, sula, sopha.
Eranda patra alleviates vata, is raktapitta prakopi, cures kapha, krmi, mutra dosha, gulma, vasti sula, saptavidha vrddhi.

Eranda puspa is vataghna, kapha-pitta vinasana, mutra dosha hara, raktapitta prakopana.

Eranda phala is katuka in rasa, highly usna, dipana para, alleviates gulma, sula, anila, yakrt, pliha, udara and arsa.

Its majja is vidbhedi and cures vata, slesma, udara.

Rakta panchangula is tikta, kashaya, katuka in rasa, cures vata, slesma, svasa, kasa, kampa, arsa, vardhma.

सतिक्तोष्णमेरण्डं तैलं स्वादु सरं गुरु ।
वर्ध्मगुल्मानिलकफानुदरं विषमज्वरम् ॥
रुक्शोफौ च कटीगुह्यकोष्ठपृष्ठाश्रयौ जयेत् ।
तीक्ष्णोष्णं पिच्छिलं विस्रं रक्तैरण्डोद्भवं त्वति ॥ (A.Hr.)

Eranda taila is tikta, svadu in rasa, usna in veerya, sara, guru in guna, cures vardhma, gulma, anila, kapha, udara, visama jvara, ruk, sopha, kati guhya kostha prstha.

Rakta eranda is tiksna, picchila in guna, usna in veerya and visra.

तैलमेरण्डजं तीक्ष्णं दीपनं पिच्छिलं गुरु ।
कषायानुरसं सूक्ष्ममुष्णं स्रोतोविशोधनम् ॥
विस्रं स्वादु रसे पाके सतिक्तं कटुकं सरम् ।
वयसःस्थापनं त्वच्यं योनिशुक्लविशोधनम् ॥
मेधाकान्तिबलारोग्यस्मृतिशुक्लविवर्द्धनम् ।
वातं वातकफं हन्ति कुरुते केवलं कफम् ॥
गुल्मप्लीहोदरानाहविबन्धान् वातशोणितम् ।
अष्टीलावर्ध्महृद्रोगविषमज्वरविद्रधीः ॥
शूलशोफौ कटीगुह्यकोष्ठपृष्ठोद्भवौ जयेद् ।
रक्तैरण्डोद्भवं तैलं तीक्ष्णोष्णं पिच्छिलं भृशम् ॥ (Kdn)

Eranda taila is tiksna, dipana, picchila, guru in guna, kashaya in anurasa, suksma, usna in veerya, srotovisodhana, visra, svadu in rasa and paka, tikta and katu in rasa, sara, vayasthapana, tvacya, yoni-sukla visodhana, medha-kanti-bala-arogya-smrti-sukra vivardhana, vata kapha hara, kevala kapha karaka, alleviates gulma, pliha, udara, anaha, vibandha, vata, sonita, astila, vardhma, hrdroga, visama jvara, vidradhi, sula, sopha, kati guhya, kostha-prstha vyatha.

Rakta eranda taila is tiksna, picchila in guna, usna in veerya.

एरण्डतैलं तीक्ष्णोष्णं दीपनं पिच्छिलं गुरु ।
वृष्यं त्वच्यं वयःस्थायी मेधाकान्तिबलप्रदम् ॥
कषायानुरसं सूक्ष्मं  योनिशुक्लविशोधनम् ।
विस्रं स्वादु रसं पाके सतिक्तं कटुकंसरम् ॥
विषमज्वरहृद्रोगपृष्ठगुह्यादिशूलनुत् ।
हन्ति वातोदरानाहगुल्माष्ठीलाकटीग्रहान् ॥
वातशोणितविट्बन्धब्रध्नशोफामविद्रधीन् ।

आमवातगजेन्द्रस्य शरीरवनचारिणः ॥
एकमेव निहन्तायमेरण्डस्नेहकेरी । (Bpn)

Eranda taila is tiksna, picchila, guru in guna, usna in veerya, dipana, vrsya, tvachya, vayasthapani, medha-kanti-bala prada, kashaya in anu rasa, suksma, yoni sukla visodhana, visra, svadu in rasa and paka, tikta, katuka in rasa, sara, cures visama jvara, hrdroga, prstha guhyadi sula, vatodara, anaha, gulma, asthila, kati graha, vata sonita, vit bandha, bradhna, sopha, ama, vidhradhi, ama vata.

This has got the capacity to expel the disease named amavata that is like gaja in the jungle of sarira.